## शार्दूलविक्रीडित छन्दः

*लक्षणम्*

"सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।"

यस्य चतुर्षु चरणेषु क्रमेण मगणः सगणः जगणः सगणः तगणः तगणस्ततश्चैको गुरुवर्णः स्यात्, तदेव शार्दूलविक्रीडितं नाम वृत्तम्। अस्मिन् सूर्याश्वैः सूर्यैः द्वादशभिः, अश्वैः सप्तभिश्च वर्णैर्यतिः क्रियते। इदमूनविंशत्यक्षरा-वृत्तिमध्ये अतिधृतिभेदतया गण्यते।

*उदाहरणम्*

पातुं न प्रथमं व्यवस्य तिजलं युष्मास्व पीतेसु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्येः बः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

उक्तोदाहरणे क्रमेण मगण-सगण-जगण-सगण-तगणद्वयान्तरं गुरुवर्णश्चैको वर्तते, द्वादश-सप्तभिर्वर्णैर्यतिः। अतोऽत्र शार्दूलविक्रीडितं नाम वृत्तमस्ति।

## स्रग्धरा छन्दः

*लक्षणम्*

"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्"।

यस्य वृत्तस्य सर्वेषु चरणेषु क्रमेण मगणः रगणः, भगणः, नगणः यगणत्रयञ्च भवेत्, त्रिमुनियति-युता सप्त-सप्त-सप्तमिश्च यतियुता भवेत, तदेव स्रग्धरा नाम वृत्तम्। इदं चैकविंशत्यक्षरा-वृत्तेर्भेदः।

*उदाहरणम्*

या सृष्टिः स्रष्टुरा द्यावहतिविधि हुतंयाहविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा, या स्थिता व्याप्यविश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यथा प्राणिनः प्राणवन्तः,
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।

*अत्रोदाहरणे प्रत्येकस्मिन् चरणे क्रमानुसारं*

मगण-रगण-भगण-नगण-यगणत्रयस्य वर्णयोजना वर्तते। सप्त-सप्तभिश्च वर्णैर्यतिरपि वर्तते।

अतोऽत्र स्रग्धरा नाम वृत्तमस्ति।

# अलंकार

"अलङ्क्रियते अनेन इति अलङ्कारः" अर्थात् अलंकार रसाद्युत्कर्षजनकत्वे सति शोभातिशासित-काव्यधर्मत्वम् अलङ्कारत्वम्। उक्तं च काव्यप्रकाशस्य अष्टमोल्लासे मम्मटेन

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलंङ्कारास्तेऽनुपगासोपमादयः।।

यथा हारादयः कण्ठाद्यङ्गानाम् आत्मनश्च अतिशयाधानद्वारेणोपकारकाः तथैव शब्दार्थद्वारेण ये धर्मा कदाचित् अङ्गिनं रसम् उपकुर्वन्ति, ते अनुप्रासोपमादयः 'अलङ्कार' पदेन उच्यते। काव्ये शब्दार्थहारेण रसादेरूपकारकत्वम् एवं तेतेषां मुख्यं प्रयोजनम्

*इत्थम् अलङ्कारविषये विषयत्रयम् अवधातव्यम्*

- काव्ये अलङ्काराः शब्दार्थरूपी अङ्गानां शोभाधायकाः भवन्ति, किन्तु परम्परया आत्मभूतं मुख्यं रसमपि उपकुर्वन्तिः तद्यथा-**अपसारय घनसारं" वदति दिवानिशं बाला।**
  अत्र अनुप्रासालङ्कारेण विप्रलम्भशृङ्गारसस्य उत्कर्षाधायकत्वं वर्णितम्।
- यत्र रसः नास्ति तत्र अलङ्कारा: उक्तिवैचित्र्यमात्र बोधका भवन्ति। यथा
  चित्ते विघटते न त्रुट्यति .......... चिरं तरुणी प्रगल्भा।
  अत्र रसस्योपकारकत्वं नास्ति, उक्ति वैचित्र्यमात्रमेव।
- क्वचितु विद्यमाने रसेऽपि नोपकुर्वन्ति, तद्यथा
  मित्रे क्वापि गते सरोरुहवने .........जीवस्य निर्गच्छतः।
  अत्र रसस्य प्रतिकूलोपमालङ्कारः वर्तते।

**अलङ्कारस्तु त्रिविधः**

- शब्दगतः, यथा–यमकानुप्रासादयः।
- अर्थगतः, यथा–उपमारूपकादयः।
- शब्दार्थागतः, यथा–पुनरुक्तवदाभासश्च।

अलङ्काराणां संख्याविषये आचार्याणां मतैक्यं न दृश्यते। मम्मटमते 67, रुय्यकमते 78, विश्वनाथमतेऽपि 78, जयदेवमते 100, अप्पयदीक्षितमेषु 120, अलङ्काराः सन्ति।

# अलंकाराणां वर्णनं

*पाठ्यक्रमानुसारम् अत्र अलंकाराणां वर्णनं प्रस्तूयते*

## वक्रोक्ति-अलंकारः

कथितस्य वाक्यस्य श्लेषेण अथवा काक्वा अन्य एवार्थः कल्पितो भवेत् तत्र वक्रोक्तिर्भवति। वक्ता कस्मिन् अन्य एवार्थः कल्पिती भवेत् तत्र वक्रोक्तिर्भवति। वक्ता कस्मिन् एकस्मिन् अर्थे वाक्यस्य प्रयोगं करोति तथा श्रोता तस्य अपरमर्थमवगत्य कथनं करोति। तत्रायं चमत्कारी अलंकारो भवति। वक्रोक्तेः इयं सीमित कल्पना रुद्रटेन कृताऽस्ति। कुन्तकद्वारेण एषा एव वक्रोक्तिः एकस्य व्यापकस्य काव्यतत्त्वस्य प्रतिनिधित्वं करोतिः

*उदाहरणम्*

धन्या केयं स्थिता ते शिरसि शशिकला किन्नु नामैतदस्या,
नामैवास्यास्तदेतत् परिचितमपि ते विस्मृतं कस्य हेतोः।
नारा पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-,
देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः।।

## अनुप्रास-अलंकारः

"वर्णसाम्यमनुप्रासः"

वर्णानां साम्यम् अनुप्रासालङ्कार इत्युच्यते।
वर्णसाम्यम् स्वरवैसादृश्येऽपि व्यञ्जनसादृश्यम्।

**अनुप्रासः** रसाद्यनुगतः प्रकृष्टो न्यासः, अर्थात् रसाद्यनु-कूलवर्णानां सन्निवेशः।

- ***छेकानुप्रासः*** "सोऽनेकस्य सकृत्पूर्वः"

  अनेकवर्णानां एकवारं साम्यं भवति।
  तद्यथा ततोऽरुणपरिस्पन्द मन्दीकृतवपुः शशी।

  अत्र 'स्पन्द-मन्द' 'कामकामिनी' 'गण्ड-पाण्डु' इत्यादीनाम् अनेकवर्णानाम् एकधा आवृत्तिः भवति।

- वृत्यानुप्रास: "एकस्याप्यसकृत्पर:"
  अत्र एकवर्णस्य अनेकवर्णानां वा अनेकधा आवृत्ति: भवति। तद्यथा
  अपसारय घनसारं कुरुहारं दूर एव किं कमलै:।
  अत्र 'र' 'ल' इत्यनयो: वर्णयो: अनेकधा आवृत्ति: भवति।
- लाटानुप्रास: (शब्दानुप्रास:)
  "शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रत:। पदानां स: पदस्यापि वृत्तावन्यत्र तत्र वा।" अत्र पदानाम् आवृत्तिर्भवति।

  *उदाहरणम्*

  यस्य न सविधे दयिता,
  दवदहनस्तुहिनदीधितिस्तस्य।
  यस्य च सविध्यो दयिता,
  दवदहनस्तुहिनदीधितिस्तस्य।।

  अत्र अनेकपदानां आवृत्तिरस्ति, किन्तु अनव्यभेदेन तात्पर्यभेदो जायते।

## यमक अलंकार:

सत्यर्थे पृथगर्थाया: स्वरव्यञ्जनसंहते:।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।

अर्थे वाच्यार्थे स्थिते सति, पृथग् भिन्न: अर्थ: प्रकृतिप्रतिपाद्यो वाच्यो यस्यास्तस्या:, स्वरव्यंजनसंहते: स्वरव्यञ्जनवर्णसमुदायस्या:, तेनैव क्रमेण पूर्वक्रमेणैव अर्थात् येन क्रमेण प्रथमं स्वरव्यञ्जनसमूह उक्तस्तेनैव आवृति: पुनरुच्चारणं यत्र भवति तदेव यमकं नामालङ्कारो विनिद्यते कथ्यते। स्वरव्यञ्जनसंहतिक्रम-निवेश्यत्वेन यमयति श्रुतिमधुरतया सचेतसां हृदयमानन्दे नियमयतीति यमकम्।

*उदाहरणम्*

नवपलाश-पलाशवनं पुर: स्फुटपराग-परागत-पङ्कजम्।
मृदुल-तान्त-लतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरै:।।

अत्र 'पलाश-पलाश' सुरभिं-सुरभिं चेत्यत्र द्वयो: पदयो: सार्थकत्वम्, 'लतान्त-लतान्त' इत्यत्र प्रथमस्य निरर्थकत्वम्, 'पराग-पराग' इत्यत्र द्वितीयस्य पदस्य निरर्थकत्वम्, 'लतान्त-लतान्त इत्यत्र द्वितीयस्यैव सार्थकत्वम्, अथ च 'रभिं सु-रभिं सु' इत्यत्र द्वयो: पदयोर्निरर्थकत्वमस्ति।

इदं पदावृत्तियमकस्योदाहरणम्।

## श्लेष-अलंकार

वाच्यभेदेन भिन्ना यद् युगपद् भाषाणस्पृश:।
शिलष्यन्ति शब्द: श्लेषोऽसावक्षरादिभिरष्टधा।।

अर्थभेदेन पृथक्-पृथक् शब्दा: युगपत् उच्चारण-विषयत्वात् शिलष्टा: प्रतीयन्ते तदेव श्लेषोऽलंकार:। श्लेषालंकारस्य मुख्यत: शब्दश्लेष: अर्थश्लेष: च नामानौ द्वौ भेदौ सम्पद्येते।

**शब्दश्लेष:**

*शब्दश्लेषोऽपि पुन: सभंग अभंगभेदेन च त्रयप्रकारो भवति।*

***सभंग श्लेष:***

पृथुकार्त्स्वरपात्रं भूषितानि: शेष-परिजनं देव:।
विलसत्करेणुगहनं सम्प्रति समनावयो सदनम्।।

- ***पृथुकार्तस्वरपात्रम्*** याचकपक्षे पृथुक + आर्तस्वर + पात्रम्।
  पृथुकानां बालानाम् आन्तर्स्वरस्य करुणक्रन्दनस्य पात्रं गृहम्।
  राज्ञ:पक्षे — पुथु + कार्त्तस्वर + पात्रम्।
  पृथूनि विपुलानि कार्त्तस्वरस्य सुवर्णस्य पात्राणि यत्र तत्।
- ***भूषितनि: शेष-परिजनम्***
  याचकपक्षे—भू + उषित + नि:शेष + परिजन:।
  समस्तपरिवार: पृथिव्यां शेते इत्यर्थ:।
  राज्ञ:पक्षे—भूषित + नि:शेष + परिजन:।
  सर्वे परिजना: सुसज्जिता: भवति इत्यर्थ:।
- ***विलसत्करेणुगहनम्*** याचकपक्षे विले सीदन्ति इति विलसत्का: मूषका: तेषां रेणुभि: धूलिभि: व्याप्तम्।
  राज्ञ:पक्षे विनसन्तीभि: करेणुभि: हस्तिनीभि: गहनं व्याप्तम्।
  इत्यम् अत्र पदश्लेषोऽलंकार:।
  अभंगश्लेष: 'भेदाभावात्प्रकृत्यार्भेदोऽपि नवमो भवेत्'
  यथा—योऽसकृत्परगोत्राणां ...... विवुधेन्द्र: स राजते।

अत्र 'परगोत्रादि' शब्दा: अनेकार्थका:, अत: राजपक्षे इन्द्रपक्षे च अर्थद्वयस्य वाच्यात् अभंगश्लेषेऽलंकार:।

### अर्थश्लेष:

यत्र शब्दात् परिवर्तनेनापि श्लेषस्य खण्डो न भवति।

*उदाहरण्*

"स्तोकेनोन्नतिमायाति स्तोकेनायाति अधोगतिम्।
अहो सुसदृशी वृत्तिस्तुलाकोटे: खलस्य च।।"

अत्र 'स्तोकेन उन्नतिमायाति' आदिपदानां परिवर्तनं कृत्वा यदि तत्समानार्थका: अन्ये शब्दा: प्रयुक्ता: भवेयु: तथापि श्लेषे बाधा न भवति, अत: इत्यमत्र अर्थश्लेष:।

## उपमा-अलंकार:

'साधर्म्यमुपमा-भेदे पूर्णा लुप्ता च' अर्थात् द्वयो: भिन्नयो: पदार्थयो: साधर्म्यस्य उपमानोपमेयभावेन वर्णनम् अथवा उपमानोपमेययो: भेदे सति सादृश्यकथनमेव उपमा कथ्यते।

उक्तञ्च—'उपमानोपमेययोरेव समानेन धर्मेण गुणक्रियादिरूपेण सम्बन्ध: उपमा भवति। न तु कार्येकरणादिकयो: साधर्म्यम्। उपमालंकारस्य पूर्णालुप्ता-श्रौती-आर्थी-इत्यादय-अनेक भेदा: सन्ति।'

आचार्यमम्मट: प्रथमम् उपमाया: भेदद्वयं निरूपयति—'पूर्णा लुप्ता च'।

### पूर्णोपमा

उपमान-उपमेय-साधारणधर्म-उपमाप्रतिपादकानां चतुर्णामपि उपादाने पूर्णोपमा। यथा—'कमलमिव मनोज्ञं मुखम्।'

- ***उपमान:*** द्वयो: सदृशपदार्थयो: उत्कृष्टगुणवान् उपमान:। यथा—कमलम्।
- ***उपमेय:*** द्वयो: सदृशपदार्थयो: निकृष्टगुणवान् उपमेय:। यथा—मुखम्।
- ***साधारणधर्म:*** उपमानोपमेययो: द्वयो: य: धर्म: भवति स: साधारणधर्म:। यथा—मनोज्ञत्वम्।
- ***उपमानवाचकशब्दा:*** इव, यथा, तुल्य:, सदृश, वत्, इत्यादय:। सा च पूर्णोपमा द्विधा- श्रौती आर्थी च। श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा इत्यनेन श्रोत्यर्थयो: द्वयो: भेदत्रयं भवति। इत्थं पूर्णोपमाया: आहत्य षड्भेदा: भवन्ति।

### लुप्तोपमा

'एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता' उपमाया: चतुर्षु अंगेषु कस्यचित् एकस्य, कयोश्चित् द्वयो: केषाञ्चित् त्रयाणां वा लोपे सति लुप्तोपमा भवति। इत्थं लुप्तोपमाया: एकोनविंशति: भेदा: सन्ति:।

## रूपक-अलंकार:

"तद्रूपकमभेदो य उपमानोपमेययो:"

उपमानोपमेययो: अतिसाम्यात् य: अभेदारोप:, तत् रूपकम्। रूपयति एकतां नयतीति रूपकम्। इत्थम् उपमानोपमेययो: अतिसाम्यप्रदर्शनाय काल्पनिकोऽभेदारोपो रूपकलंकार:; यथा—मुखचन्द्र:।

*उदाहरणम्*

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्द्धानव्यसनरसिका रात्रिकापालिकीयम्।।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले।
न्यस्तं सिद्धांजनपरिमलं लांछनस्यच्छलेन।।

*अत्र* 'रात्रि:' उपमेयत्वेन तथा 'कापालिकी' उपमानत्वेन वर्णितम्। अत: अतिसादृश्यात् रात्रौ कापालिक्या: (रात्रिरेव कापालिकी) ज्योत्स्नायां भस्मस्य, तारकासु अस्थिन:, चन्द्रकलायां कपालस्य आरोपत्वात् रूपकालङ्कार: वर्तते।

### उपमारूपकयो: भेद:

उपमारूपकौ द्वौ अपि सदृश्यमूलकालङ्कारौ स्त:। *तथापि सन्ति केचन भेदा*

- साधर्म्यमुपमा भेदे' इति लक्षणेन उपमानोपमेययो: भेदे सति साधर्म्यं भवति।
- तद्रूपकभेदो य उपमानोपमेययो: इत्यनेन उपमेये (मुखे) उपमानस्य (चन्द्रकस्य) आरोप: क्रियते।
- उपमायां साधर्म्यं वाच्यगतं भवति। रूपके साधर्म्यं व्यंग्यगतं भवति।
- उपमायां उपमेयस्य प्रामुख्यं भवति। रूपके उपमानस्य महत्त्वं भवति।
- उपमायां उपमानोपमेययो: भेद: भवति; यथा—चन्द्रवन्मुखम्। रूपके उपमानोपमेययो: अभेदप्रीति: भवति। यथा—मुखं चन्द्र:।

## उत्प्रेक्षा-अलंकार:

'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्' प्रकृतस्य अर्थात् उपमेयस्य; समेन अर्थात्-उपमानेन; सम्भावनम् अर्थात् उत्कटकोटिकसन्देह:। अत: उपमेयस्य उपमानेन सह तादाम्येन य: उत्कटकोटि सन्देह: भवति स 'उत्प्रेक्षा अलंकार' इत्युच्यते। सा च उत्प्रेक्षा हेतु-फल-स्वरूप-सम्भावना-भेदात् बहुप्रकारा:;

*उदाहरणम्*

लिम्पतीव तमोऽङ्गानि वर्षतीवांजनं नभ:।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता।।

अत्र व्यापनादि लेपनादिरूपतया उत्प्रक्षितम् इति क्रियास्वरूपोत्प्रेक्षा।

उन्मेषं यो मम न सहते ते पादयो: पादलक्ष्मी:।

*अत्र* उपमेयभता स्वाभाविकी पादशोभा उपमानभूतयथोक्त- र्हषहेतुकपादपतन-विषयीभूतपद्मशोभात्वेन सम्भाविता इति हेतूत्प्रेक्षा।

### उपमा-उत्प्रेक्षयो: भेद:

- 'साधर्म्यमुपमा भेदे' इति लक्षणेन उपमानोपमेययो: भेदे सति साधर्म्यं भवति। 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्'—उत्प्रेक्षा अलंकार इत्युच्यते
- उपमा-साधर्म्यमूलक: अलंकार:, परन्तु उत्प्रेक्षा-अध्यवसायमूलक: अलंकार भवति। उपमायाम् उपमेयस्य उपमानेन सह तुलना क्रियते उत्प्रेक्षायाम् उपमेये उपमानस्य सम्भावना क्रियते।
- उपमायाम् उपमानोपमेययो: निश्चयात्मकज्ञानं भवति परन्तु उत्प्रेक्षायां संशयात्मकज्ञानं भवति।
- वत्, यथा, तुल्य:, सह-इति-उपमावाचकशब्दानां प्रयोग: मन्ये, शंके, ध्रुवमाद्युत्प्रेक्षावाचकशब्दानां प्रयोग: भवति।
- उपमालंकारे 'इव' शब्दस्य प्रयोग: संज्ञाशब्दै: सह भवति। यथा-वागर्थाविव उत्प्रेक्षालंकारे क्रियापदै: सह प्रयोग: भवति। यथा—लिम्पतीव।

## समासोक्ति-अलंकार:

'परोक्तिर्भेदकै: श्लिष्टै: समासोक्ति:' अर्थात् श्लेषयुक्त: विशेषणै: अप्रकृतस्य कथनम् समासेन संक्षेपेण उक्ति: समासोक्त्यलंकार अभिधीयते;

*उदाहरणम्*

लब्ध्वा तव बाहुस्पर्शं यस्या: स कोऽप्युल्लास:।
जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा।।

*अत्र* विशेष्यवाचक: 'जयलक्ष्मी', शब्द: न केवलं 'कान्ता' रूप-अर्थस्य वाचक: अपितु 'बाहुस्पर्शादिभि: श्लेषयुक्तविशेषणै: 'नायिका' इत्यर्थस्यापि बोधक: अत: समासोक्तिरलंकार:।

## अपह्नुति-अलंकार:

'प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुति:'। अर्थात् प्रकृतं (उपमेयं) निषिध्य यत्र अन्यस्य (उपमानस्य) सिद्धि: क्रियते तत्र अपह्नुति: अलंकार:।

"उपमेयमसत्यं कृत्वा उपमानं सत्यतया यत्स्थाप्यते सा तु अपह्नुति:।"

### शाब्दी अपह्नुति:

यत्र प्रकृतस्य निषेध: शब्देन क्रियते;

*उदाहरणम्*

अवाप्त: प्रागल्भ्यं परिणतरुच: शैलतनये।
कलङ्को नैवायं विलसति शशांकस्य वपुषि।।
अमुष्येयं मन्ये विगलदमृतस्यन्द-शिशिरे।
रातिश्रान्ता शेते रजनिरमणी गाढमुरसि।।

*अत्र* उपमेयरूपं 'कलंक' इत्यस्य 'नैवायं' इत्यनेन शब्दश: निषेध: कृत्वा उपमानभूतरात्र्या: सत्यता प्रतिपादिता, अत: शाब्दी अपह्नुति:।

**आर्थी अपह्नुतिः**

यत्र प्रकृतस्य निषेधः अर्थतः भवति;

*उदाहरणम्*


वत सखि। कियदेतत् पश्य वर स्मरस्य।
प्रियविरहकृशेऽस्मिन् रागिलोके तथाहि।।
उपवनसहकारोद् भासिभृङ्गच्छलेन।
प्रतिविशिखमनेनोट् टंकितं कालकूटम्।।

अत्र उपमेयभूतभ्रमराणां निषेधं कृत्वा उपमान भूतकालकूटविषयस्य स्थापना कृता अतः आर्थी अपह्नुतिः।

## निदर्शना अलंकारः

'निदर्शना अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः' अर्थात् यत्र अनुपपद्यमानवस्तुसम्बन्धः उपमायां पर्यवसतिः भवति तत्र निदर्शनाऽलंकारः भवति।

*अर्थात्* यदा वाक्यार्थयोः पदार्थयोर्वा परस्परं अन्वयबोधो न भवति, तदा अन्वयबोधाय तयोः द्वयोः वाक्ययोः यत्र उपमानोपमेयभावस्य परिकल्पना क्रियते तत्र निदर्शनाऽलंकारः।




*उदाहरणम्*

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

अत्र उडुपेन सागरतरणवत् मम मत्या सूर्यवंशवर्णनम् असंभावितम् इति उपमां परिकल्पयति। उपमायां पर्यवसनात् वाक्यार्थनिदर्शना।

उदयति विततोर्ध्वरश्मिरज्जौ……वारणेन्द्रलीलाम्।।

अत्र वारणेन्द्रलीलापदार्थेन गिरिपदार्थस्य अन्वय-अनुपपन्नः, अतः वारणेन्द्रलीला सदृशीं लीलाम् इत्युपमायां पर्यवसनात् पदार्थनिदर्शना।

## अर्थान्तरन्यास अलंकारः

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।।

यत्र सामान्यं विशेषण-विशेषो वा सामान्येन समर्थ्यते तत्र 'अर्थान्तरन्यासोऽलंकारः' भवति।


'साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः।'

विशेषेण सामान्यस्य समर्थनं साधर्म्येण;

*उदाहरणम्*

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शंखमपि पीतम्।।

अत्र निजदोषेत्यादि सामान्यं शंखपीतिम्ना विशेषकथनेन समर्थितम्। अतः विशेषण सामान्य समर्थनरूपोऽर्थान्तरन्यास अत्र।




विशेषेण सामान्यस्य समर्थनं वैधर्म्येण

'गुणानामेव दौरात्मयाद् धुरि धुर्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलि।।'

अत्र 'धुरि धुर्यो नियुज्यते' इति सामान्यं 'सुखं स्वपिति गौर्गलिः' इति विशेषेण समार्थितम्।

## दृष्टान्त-अलंकारः

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्

लक्षणेऽस्मिन् पूर्वसूत्रात् 'वाक्यद्वये' इति पदस्य अनुवृत्तिर्भवति। एतेषां = साधारणधर्मादीनाम्। **दृष्टोऽन्तो निश्चयो सत्र स दृष्टान्तः** उपमेयवाक्ये उपमानवाक्ये च उपमानोपमेय साधारणधर्मादीनां सर्वेषां बिम्बप्रतिबिम्बभावः दृष्टान्तालंकारः

स च दृष्टान्तः साधर्म्यवैधर्म्याभ्यां द्विधा भवति।

तत्र साधर्म्येण;

*उदाहरणम्*

त्वयि दृष्ट एव तस्याः निर्वाति मनो मनोभवज्वलितम्।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः।।

अत्र नृपचन्द्रयोः नायिकाकुमुदवत्योः मनःकुसुमयोः निर्वाणविकासयोश्च बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः।

वैधर्म्येण

*उदाहरणम्*

तवाहवे साहसकर्मशर्मणः………स्थिरतां हि पांसवः।
अत्र पांशुभटयोः पलायनाऽस्थिरत्वयोः बिम्बप्रतिबिम्बभावः।

## विभावना अलंकारः

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना' प्रसिद्धकारणनिषेधेऽपि तत्कार्यस्वरूपफलस्य प्रकाशनं विभावनाऽलंकारः। अर्थात् कारणाभावेऽपि फलोत्पत्तिः विभावना।

'विभावयति कल्पयति कारणान्तरम् इति विभावना।'

*उदाहरणम्*

कुसुमितलताभिरहताऽप्यधत्त रुजमलिकुलैरदष्ठापि।
परिवर्तते स्म नलिनी लहरीभिरलोलिताऽप्यघूर्णत सा।।

अत्र लताहननं पीडाहेतुः, भ्रमरदंशः परिवर्तनहेतुः, तरंगसम्बन्धः घूर्णनहेतुः, एतेषां हेतूनाम् अभावेऽपि पीडादिरूपकार्यस्य कथनम् इति विभावनाऽलंकारः।

विभावनायां कारणस्य अभावेऽपि कार्यस्य सद्भावः किन्तु विशेषोक्त्यलंकारे तु कारणस्य सद्भावेऽपि कार्यस्य अभावः।

## विशेषोक्ति-अलंकारः

'विशेषोक्तिखण्डेषु कारणेषु फलावचः' अर्थात् प्रसिद्धकारणेषु सत्सु अपि कार्यस्य अभावकथनं विशेषोक्तिरलङ्कारः। उक्तञ्च 'मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः'।

### विशेषोक्तिस्तु त्रिविधा

- अनुक्तनिमित्ता
- उक्तनिमित्ता
- अचिन्त्यनिमित्ता च

**अनुक्तनिमित्ता विशेषोक्तिः**

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते।
श्लथीकृताश्लेषरसे भुजंगे चचाल नालिङ्गनतोऽङ्गना सा।।

अत्र निद्रानिवृत्तिसूर्योदयादिरूपकारणसत्त्वेऽपि आलिङ्गनपरित्याग-रूपकार्याऽभावः विशेषोक्तिः। सा च अनुरागातिशयनिमित्तस्य अनुक्तेः अनुक्तनिमित्ता।

**उक्तनिमित्ता विशेषोक्तिः**

कर्पूर इव दग्धोऽपि शक्तिमान यो जने-जने।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे।।

अत्र शरीरदाहः शक्तिक्षयस्य कारणम्। कारणे सत्यपि शक्तिक्षयरूपकार्यस्य अभावात् विशेषोक्तिः।

**अचिन्त्यनिमित्ता विशेषोक्तिः**

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।
हरताऽपि तनुं यस्य शम्भुना न बलं हृतम्।।

अत्र तनुहरणं बलहरणस्य कारणम्। कारणे सत्यपि बलहरणरूपकार्यस्य अभावात् विशेषोक्तिरलंकारः।

## स्वभावोक्ति अलंकारः

स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्।

अर्थद्वारेण काव्यस्य सौन्दर्यवर्धका अर्थालङ्कारा भवन्ति, ते च स्वभावोक्तिरूपमादयो बहवो मन्यते। तत्रार्थालङ्कारेषु स्वभावोक्तिरलङ्कारे वस्तुनो डिम्भादिकस्य स्वक्रियारूपा-दिकस्य स्वभावस्य वर्णनं निरूपणं वा तत्स्वभाववर्णनं वा भवति, तत्र वस्तूनां प्रकृतञ्चेति तद् वस्तुनि विशेषचातुर्यबोध्यत्वेन प्रत्यक्षमिव दर्शयित्वा सहृदय-काव्यरसिकानां मनांसि नितरां विशेषेणाकर्षयतीति तस्याः स्वभावोक्तेरति चमत्कारितया तामेवात्र प्रथमं निरूप्यते। यत्र वस्तुवर्णनं डिम्भादिकस्य चेष्टाकृतिस्वभावादिकस्य वर्णनं यथावत्स्वाभाविकं चारु सहृदयसंवेघञ्च भवति, असौ स्वभावस्योक्तिर्यत्रेति व्युत्पत्या स्वभावोक्तिस्तन्ना-मालङ्कारो मन्यते।

*उदाहरणम्*

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्घावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवत्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति।।

ग्रीवाभङ्गभिराममित्यादौ मृगः स्वात्मरक्षायै भीतिवशात् सततं धावन्नपि बारं-बारं ग्रीवामाकुञ्च्य स्यन्दनं पश्यति, शीघ्रतया प्लुनिवशाच्च भूमौ स्तोकमाकाशे-ऽधिकं प्रयाति अनेन प्रकारेण कविना तस्य शारीरिकक्रियादीनां स्वाभाविकं वर्णनं कृतमिति स्वभावोक्तिरलङ्कारः।

## विरोधाभास अलंकारः

"विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः"।

अविरोधेऽपि वस्तुतो विरोधाभावेऽपि विरुद्धत्वेन विरोधप्रतिभा-प्रयोजकरूपेण यद् वचः कथनं भवति स विरोध इति कथ्यते। अत्र विरुद्धयोरिव धर्मयोर्गुण-क्रियादिरूपयोश्च एकाधिकरणतया प्रतिपादन् भवति। तथा अव्यधिकरणोरपि व्यधिकरणतया प्रतिभानयोर्धर्मयोः प्रतिपादनमेव विरोधालङ्कारः कथ्यते। अयमेव विरोधाभासोऽलङ्कारः इत्युच्यते। धर्मश्चात्र त्रिप्रकारः गुणरूपः क्रियारूपो द्रव्यरूपश्च। एवञ्च यत्र गुणादीनां विरुद्धत्वमिवाभासनं भवति, तत्र विरोधाभासालङ्कारः कथ्यते।

*उदाहरणम्*

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य यथार्थ्यं वेद कस्तव।।

श्लोके भगवतः प्रभावस्य अतिशयत्वादापाततः प्रतीयमानस्य समस्तजगदाधरस्य जगदन्तर्भूतविरुछपदार्था-धारत्वस्याप्यबाधाद् वा विरोधाभासत्वं वर्तते। परस्परविरुद्धयोः कथनयोश्च एकाधिकरण्येन समाधानमस्ति।

## सङ्कर-अलंकारः

यदा काव्ये द्वौ अथवा द्वयधिकालंकाराणां नीरक्षीरन्यायेन परस्परं सापेक्षरूपेण स्थितिर्भवति तदा संङ्करालंकार इत्युच्यते।

### सङ्करः त्रिविधः

- अङ्गाङ्गिभावसङ्करः
- सन्देहसंङ्करः
- एकाश्रयानुप्रवेशसङ्करः च

**अङ्गाङ्गिभावसङ्करः**

अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः।'

स्वस्वरूपानवस्थिते सति सापेक्षरूपेण एतेषाम् अलंकाराणां परस्परं अङ्गाङ्गिभावे (अनुग्राहनुग्राहकभावे, उपकार्योपकारकभावे) सति अङ्गाङ्गिभावसङ्करः भवति;

*उदाहरणम्*

जटाभिर्भाभिः -पितृवन इव व्योम्नि चरति।

अत्र उपमा-रूपक-उत्प्रेक्षा-श्लेषादयः चत्वारोऽपि अलंकाराः परस्परम् अङ्गाङ्गिभावेन अवस्थिताः अतः अङ्गाङ्गिभावसङ्करः विद्यते अत्र।

**सन्देहसङ्करः**

'एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः' कस्यचित् एकस्यालंकारस्य ग्रहणे सति साधकबाधकप्रमाणाभावात् अनिश्चयः एव सन्देहसङ्करः भवति। *यथा*

गभीरो तथा रत्ननिर्भरो यथा च निर्मलच्छायः।
तथा किं विधिना एष सरसपानीयो जलनिधिर्न कृतः।।

*अत्र* समासोक्तिरप्रस्तुतप्रशंसयोः द्वयोः साधकबाधकप्रमाणाऽभावात् सन्देहसङ्करः भवति।

**एकाश्रयानुप्रवेशसङ्करः**

'स्फुटमेकत्रविषये शब्दार्थलंकृतिद्वयं व्यवस्थितं च' यत्र एकस्मिन्नेव पदे शब्दार्थालङ्कारौ द्वौ अपि सुस्पष्टतया भवतः तत्र एकपदानुप्रवेशसङ्करः भवति;

*उदाहरणम्*

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्ब विस्तीर्ण,
कर्णिकमथो दिवासारविन्दम्।
श्लिष्टाष्टदिग्दलकलापमुखावतार,
बद्धान्धकारमधुपावलि सञ्चुकोच।।

*अत्र* प्रतिपदे रूपकं (अर्थालंकारः) अनुप्रासः (शब्दालंकारः) च, तयोः विद्यमानत्वात् एकपदानुप्रवेशसङ्करः।

## संसृष्टि-अलंकारः

सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः।

*अर्थात्* यत्र काव्ये द्वौ अथवा द्वयधिकालंकाराणा तिलतण्डुलन्यायेन परस्परं निरपेक्षत्वेन स्थितिर्भवति तत्र संसृष्टिलंकारः, इत्युच्यते।

### संसृष्टिः त्रिविधाः

- शब्दालंकारः
- अर्थालंकारः
- शब्दालंकारश्च।

**शब्दालंकारसंसृष्टिः**

वदनसौरभलोभपरिभ्रमद् भ्रमरसम्भ्रमसम्भ्रतशोभया।
चलितया विदधे कलमेखलाकलकलोऽलकलोल दृशांऽन्यया।

अत्र यमकानुप्रासयोः द्वयोः शब्दालंकारयोः परस्परं निरपेक्षत्वेन स्थितित्वात् शब्दालंकारसंसृष्टिः।

**अर्थालंकारसंसृष्टिः**

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता।।

अत्र उपमा-उत्प्रेक्षा-अलंकारयोः परस्परं निरपेक्षभावेन तिलतण्डुलवत् स्थितित्वात् अर्थालंकारसंसृष्टिः।

**शब्दार्थलंकारसंसृष्टिः**

'स नास्त्यत्र ग्रामे य···· परिष्वक्कामानां निवारयति।।'

अत्र रूपकानुप्रासालंकारयोः परस्परं निरपेक्षतया स्थितित्वात् शब्दार्थालंकारसंसृष्टिः।